# संस्कृत वार्ता:

दिनाङ्क :- 16/09/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- कर-नीति-चर्चायां राष्ट्रहितं प्रथमम् इति सर्वोपरि निध्याय प्रौढ-विमर्शस्य आवश्यकता इति केन्द्रीय-वित्तमन्त्रिणः निर्मला-सीतारामणस्य समाह्वानम् ।
- अन्ताराष्ट्रिय-जल-क्षेत्रे पाकिस्तानीय-नौसेना-घटकानाम् अस्वीकार्य-व्यवहारं विरुध्य भारतेन तीव्रापत्तिः प्रदर्शिता ।
- नीति-आयोगेन पञ्चविंशत्यधिक-द्विसहस्रतमस्य भारत-विद्युत्-सञ्चार-सूचकाङ्कः प्रख्यापितः, विद्युत्-वाहनानाम् अङ्गीकरणे नवदिल्ली शीर्षस्थाने, महाराष्ट्र-कर्नाटक-राज्ये च द्वितीय-तृतीय-स्थाने वर्तेते ।
- सऊदी-अरब-देशेन हूथी-विद्रोहिणां ड्रोण-विमानं निरुद्धम्, भविष्यत्-आक्रमणानां विरोधे दृढ-पदक्षेपाणां सञ्चेतना, हूथी-समूहेन आक्रमण-वार्ता प्रत्याख्याता ।
- हरियाणाराज्ये, चण्डीगढे, पञ्जाबे, पूर्वोत्तर-भारतस्य च कतिचित्- भागेषु अद्य अतिवृष्टेः वर्तते पूर्वानुमानम् ।

-----------------------------------------------------

<u>सीतरामन-कर</u>

केन्द्रीय-वित्तमन्त्री निर्मला-सीतारामनः दृढतया प्रतिपादितवती यत् सर्वकाराय समर्प्यमाणेषु कर-सम्बन्धि-प्रस्तावेषु मानाङ्क-न्यूनीकरणस्य , कर-मुक्तेः, सौविध्य-प्रदानस्य च याचनायाः अपेक्षया राष्ट्रं प्रथमम् इति भावः सर्वोपरि स्थापनीयः। सा अद्य बेङ्गलूरुनगरे अन्ताराष्ट्रिय-कर-अनुसन्धान-विश्लेषण-प्रतिष्ठानेन आयोजिते नवयुग-कराधानविषये द्विदिवसीय-सम्मेलनस्य उद्घाटनसत्रे सम्बोधयन्ती आसीत्। मन्त्री शिक्षाविदः, शोधकर्तॄन्, चिन्तकान् च आहूय स्वतन्त्र-कर-नीति-संशोधनम् सार्वजनिक-संवादस्य नियमितं भागं कर्तुं आदिष्टवती, यस्य परीक्षणं, समाह्वानम्, परिष्कारः च कर्तुं शक्यते।

-------------------------------------------------------

## <u>ईपीएफ़ओ-मन्त्रिमण्डलम्</u>

केन्द्रीय-मन्त्रिमण्डलेन कर्मचारि-भविष्य-निधि-सङ्घटने अनिवार्य-अंशदानाय विहिता मासिक-वेतन-सीमा पञ्चदश-सहस्र-रूप्यकेभ्यः संवर्ध्य पञ्चविंशति-सहस्र-रूप्यकाणि यावत् निर्धारिता। अद्य मन्त्रिमण्डल-उपवेशनानन्तरं वार्ताहरान् सम्बोधयता सूचना-प्रसारण-मन्त्रिणा अश्विनी-वैष्णवेन विज्ञापितं यत् अनेन निर्णयात्मक-पदक्षेपेण एकपञ्चाशल्लक्षाधिकाः अतिरिक्ताः कर्मचारिणः ईपीएफ़ओ अनिवार्य-सामाजिकावरणे आगमिष्यन्ति, येन श्रमिकेभ्यः सामाजिक-सुरक्षा-कवचस्य बृहत्-विस्तारो भविष्यति। अस्मिन् निर्णये सर्वकारस्य वार्षिकः व्ययभारः प्रायः एकोनचत्वारिंशदुत्तर-त्रिशताधिक-एकादशसहस्रकोटि-रूप्यकाणि सम्भाव्यते।

मन्त्रिणा न्यरूप्यत यत् चतुरधिक-द्विसहस्रतमात् चतुर्दशाधिक-द्विसहस्रतमपर्यन्तं दशकेऽस्मिन् भविष्य-निधेः वेतन-सीमा अपरिवर्तिता एवासीत्, तदनन्तरं चतुर्दशाधिक-द्विसहस्रतमस्य वर्षस्य सितम्बर-मासे इयं सीमा पञ्चदश-सहस्र-रूप्यकाणि यावत् संवर्धिता।श्रीवैष्णवेन विशेषतया प्रतिपादितं यत् वर्तमानेन निर्णयेन सैव नीतिः अग्रे प्रसारिता, यतो हि विगत-वर्षेषु वेतन-वृद्धेः, आय-संवर्धनस्य, औपचारिक-उद्योग-क्षेत्रस्य निरन्तर-विस्तारस्य च परिप्रेक्ष्ये इयं सीमा पञ्चविंशति-सहस्ररूप्यकाणि यावत् विहिता ।

-------------------------------------------------------

## <u>भारत-पाकिस्तानदेशौ</u>

विदेश-मन्त्रालयेन अद्य नवदिल्ल्यां पाकिस्तान-उच्चायोगस्य कार्यवाहक-प्रमुखः आहूतः, अथ च समुद्रे पाकिस्तानीय-नौसेना-घटकस्य अस्वीकार्य-व्यवहारं विरुध्य तीव्रापत्तिः प्रकटिता। मन्त्रालयेन एकस्मिन् वक्तव्ये स्पष्टीकृतं यत् यद्यपि अन्ताराष्ट्रिय-जल-क्षेत्रे घटितायाम् अस्यां घटनायां कापि महती क्षतिः न जाता, तथापि एषः व्यवहारः एकनवत्यधिक-एकोनविंशतितमस्य वर्षस्य अप्रैल-मासे भारत-पाकिस्तानयोः मध्ये सैन्य-अभ्यासानां, युद्धाभ्यास-सञ्चालनस्य, सैन्य-सञ्चारस्य च पूर्व-सूचना-विषये सम्पन्नस्य सन्धेः सर्वथा प्रत्यक्ष-उल्लङ्घनम् अस्ति।

विदेश-मन्त्रालयेन पाकिस्तानस्य प्रभारी-राजनयिकः निर्देशितः यत् सः सम्बद्ध-पाकिस्तानीय-अधिकारिभ्यः इदं सन्देशं प्रेषयेत् यत् भविष्ये एतादृशीनां दुर्घटनानां निवारणार्थं सर्वे सैन्य-घटकाः आवश्यकावधानं वर्तयेयुः , अथ च उभयोः पक्षयोः मध्ये सम्पन्न-द्विपक्षीय-सन्धेः प्रावधानानां पूर्ण-सम्मानं कुर्युः।

-----------------------------------------------------

**नीति आयोग**

पञ्चविंशत्यधिक द्विसहस्रतमवर्षस्य आई. ई. एम्. आई. इति इण्डिया-एलेक्ट्रिक्-मोबिलिटी-इण्डेक्स् इत्यस्य अनुसारं विद्युत्-मोबिलिटी-स्वीकरणस्य विषये राज्येषु केन्द्रशासितप्रदेशेषु च दिल्ली-नगरं शीर्षस्थाने अस्ति। अद्य नवदिल्ल्यां नीति-आयोगेन सूचकाङ्कः लोकार्पितः, यस्मिन् उपराष्ट्रियस्तरे ई-मोबिलिटी इत्यस्य कृते नीति-संरचना अथ कार्यान्वयन-परिणामयोः रूपरेखा अस्ति। दिल्ल्याः अनन्तरं, अन्यानि शीर्षप्रदर्शक-राज्यानि केन्द्रशासितप्रदेशाः च महाराष्ट्र-कर्नाटक-चण्डीगढ-गोवा-राज्यानि च सन्ति। एतत् सूचकाङ्कस्य द्वितीयं संस्करणम् अस्ति सहैव एतत् राज्यानां केन्द्र-शासित-प्रदेशानां च विद्युत्-सञ्चार-लक्ष्यानि साधयितुं प्रगतिं मापयति। सूचकाङ्कस्य विमोचनं कुर्वन् नीति आयोगस्य सदस्यः राजीव गौबा वर्यः अवदत् यत् सप्तचत्वारिंशदधिक द्विसहस्रतमवर्षपर्यन्तं विकासित-भारतस्य महत्त्वाकांक्षायै विद्युत्-सञ्चारस्य परिवर्तनम् आर्थिकं, पर्यावरणात्मकं, सामरिकं च अनिवार्यं वर्तते इति।

-----------------------------------------------------

**प्रधानमन्त्री- सेमिकान्**

प्रधानमन्त्री नरेन्द्रमोदी श्वः नवदिल्ल्याः यशोभूमौ अस्य षड्विंशत्यधिक-द्विसहस्रतमवर्षस्य सेमिकान् इण्डिया इत्यस्य पञ्चमं संस्करणम् उद्घाटयिष्यति। त्रि-दिवसीयं सम्मेलनम् प्रमुख-मञ्चरूपेण कार्यं करिष्यति, येन वैश्विक-सेमिकण्डक्टर् तथा इलेक्ट्रानिक्स्-इकोसिस्टम् इत्युभौ मिलित्वा सहयोगं वर्धयितुं, नवान्वेषणं प्रवर्तयितुं, विनिर्माण-क्षमतां सुदृढीकर्तुं, निवेशाकर्षयितुं, भविष्यस्य कृते सज्जानां प्रतिभानां विकासाय च कार्यं कर्तुं शक्यते। अस्मिन् कार्यक्रमे षट्शततोप्यधिकाः प्रदर्शकाः, त्रिशततोप्यधिकाः अन्ताराष्ट्रिय-संस्थाः, पञ्चाशत्तः अधिकाः देशाः

च सम्मिलिताः भविष्यन्ति। अस्मिन् प्रदर्शने जपान, दक्षिणकोरिया, मलेशिया, नीदरलैंडस्, सिङ्गापुर्, स्वीडन्-देशानाम् प्रतिनिधित्वं कुर्वन्तः षट् देशाः, द्वादश राज्यसर्वकारस्य मण्डपानि, समर्पिताः स्टार्ट्-अप्-मण्डपाः च दृश्यन्ते। सेमिकान् इण्डिया इति भारतस्य प्रमुखं सेमिकण्डक्टर्-सम्मेलनम् प्रदर्शनी चास्ति, यत् भारत-सेमिकण्डक्टर्-मिशन्, इलेक्ट्रानिक्स् तथा सूचना-तन्त्रज्ञान-मन्त्रालयेन, सेमी इत्यनेन च संयुक्तरूपेण आयोज्यते।

------------------------------------------------------

<u>सऊदी-ड्रोनाक्रमणम्</u>

सऊदी-अरब-देशेन विज्ञापितं यत् गतरात्रौ मक्का-नगर-समीपे तदीयेन वायु-प्रतिरक्षा-तन्त्रेण हूथी-विद्रोहिणां प्रेषितम् एकं ड्रोन-विमानम् अन्तराले एव निरुध्य विनष्टीकृतम्। यमन-देशे वैधता-समर्थक-गठबन्धन-सैन्यस्य प्रवक्ता, मेजर-जनरल् तुर्की अल-मालिकी-महाभागः घटनाम् इमां मक्का-नगरीं लक्ष्यीकृत्य हूथी-विद्रोहिणां द्वितीयः आक्रमण-प्रयासः इति न्यरूपयत्,यत्र सः सप्तदशाधिक-द्विसहस्रतमे वर्षे क्षिप्तस्य बैलिस्टिक्-प्रक्षेपास्त्रस्य पूर्व-घटनायाः सन्दर्भम् अददात्। तेन सावधानता प्रकटिता यत् सऊदी-नेतृत्वे कार्यरतः गठबन्धनः आगामि-आक्रमणानां निवारणार्थम् आवश्यक-कार्याचरणं विधास्यति। अपरत्र, हूथी-विद्रोहिभिः मक्का-नगरं प्रति आक्रमणस्य आरोपाः प्रत्याख्याताः । इयं घटना सऊदी-अरब-देशस्य अथ हूथी-विद्रोहिणां मध्ये तीव्रतया वर्धमानस्य सङ्घर्षस्य वातावरणे संवृत्ता। ह्यः सऊदी-अरब-देशस्य नागरिक-सुरक्षा-विभागेन स्वकीय-प्रमुख-रक्त-सागर-तैल-पत्तनं यन्बु इति नगरं विहाय षट्सु अन्य-नगरेषु सञ्चेतना प्रख्याप्य पश्चात् ते प्रत्याहृताः।

------------------------------------------------------

<u>ऋतु-विभाग</u>

भारतस्य ऋतु-विभागेन अद्य अण्डमान-निकोबार-द्वीपेषु, अरुणाचलप्रदेशे, असमराज्ये, मेघालये, हरियाणायां, चण्डीगढ-प्रदेशे, पञ्जाब्-प्रदेशे च प्रचण्डवृष्टिः भविष्यति इति पूर्वानुमानं प्रकटितम् अस्ति। केरलम्, माहे, पञ्जाब, उपहिमालयी पश्चिमबङ्गाल, सिक्किम, तमिलनाडु,

पुदुचेरी, करैकल् इत्येतेषु प्रदेशेषु अपि दिने तथैव स्थितिः भवितुम् अर्हति। दिल्ल्याम् अद्य सायङ्काले अल्पवृष्टिः भविष्यति इति ऋतुविभागेन पूर्वानुमानं कृतम् अस्ति। बिहारस्य, जम्मू-कश्मीरस्य, लद्दाखस्य, झारखण्ड्-राज्यस्य, ओडिशा-राज्यस्य, राजस्थान-प्रदेशे च अग्रिमे द्वि वा त्रिषु दिनेषु मेघगर्जनेन विद्युत्-स्खलनस्य च सम्भावना अस्ति इति विभागः अवदत्।

।। इति वार्ताः ।।